# Upadesha Dashakam

# ઉપદેશદશકમ્

## Document Information

Text title : Upadesha Dashakam

File name : upadeshadashakam.itx

Category : upanishhat, dashaka, upadesha, advice, upaniShat

Location : doc_upanishhat

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# ઉપદેશદશકમ્

અમ્બરમહાગહનડમ્બરવિડમ્બિમારવમરીચિપરિવાહપરિહાસિ ।
સત્યદૃશિ યત્ર સમુદેતિ વિયદાદિઃ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૧॥

ચિત્રકમભિત્તિકમિવોદયતિ યત્ર વ્યોમનિ વિભૂમનિ સમસ્તમનવસ્થમ્ ।
સત્યસુખબોધવપુરસ્તિ યદનન્તં તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૨॥

ઉદ્ઘનઘનસ્થિતિવિમોહસમુદગ્ચત્તાડયવિનિઘ્ન જગદાયસવિકારૈઃ ।
વ્યેતિ ન સમેતિ ન ચ યત્પરમપારં તત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૩॥

અલ્પકમનલ્પમહિમન્યપવિકલ્પે યત્ર ચ ન પશ્યતિ શ ૃણોતિ ન ચ કિઞ્ચિત્ ।
યત્પરમભૂમસુખવસ્તુપરિગીતં તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૪॥

અમ્બરમણેરમલબિમ્બમનુવિમ્વદ્ભઙ્ગિમતરઙ્ગગુણસઙ્ગતમિવાન્ધૌ ।
બુદ્ધિગુણબદ્ધમિવ યત્તદનુવિદ્ધં તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૫॥

કસ્તવ સ સપ્તકવિતસ્તિમિતકાયો દુસ્તરસમસ્તરુગુપસ્તરુણકો યઃ ।
યસ્તુ તમસઃ પરમપારસુખરૂપં તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૬।
પશ્યતિ શ ૃણોતિ પરિજિઘ્રતિ ચ યેન સ્વાદયતિ વાચમભિવ્યક્ત્યવિશયેન ।
શશ્વદધિવિશ્વમનુપશ્યતિ ધિયં યત્તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૭॥

સત્વગુણવૃત્તિપટુનૃત્તપરિવર્તાનિઙ્ગતિ મણિદ્યુતિનિરઙ્ગમપસઙ્ગમ્ ।
તેજયતિ યન્ન રવિચન્દ્રમુખતેજઃ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૮॥

વસ્તુ જગતશ્ચ યદનન્તરમબાહ્યં યસ્ય ચ જગત્તદનન્તરમબાહ્યમ્ ।
યચ્ચ જગદેતદજગચ્ચ પરિશુદ્ધં તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૯॥

અદ્વયમનાદિમદનન્તરમનન્તં સન્તતસુખં તદુપશાન્તગુણમોહમ્ ।
જ્યોતિરનુદીતકમનસ્તમિતમેકં તત્ત્વમસિ તત્ત્વમસિ તત્ત્વમસિ તચ્ચમ્ ॥ ૧૦॥

ગુહ્યમિદમેતદુપદેશદશકં યસ્ત્વકત્તસલૈષણ ગુણૌ ગુરુપુરસ્સન્ ।
શીલયતિ સોઽપિ ચ ગૃણાતિ ગુરુભૂતઃ તત્ત્વમસિ તત્ત્વમસિ તત્વમસિ તત્વમ્ ॥ ૧૧॥

નિસ્તમસિ નીરજસિ નિર્ગલિતસત્વે તેજસિ વિવેકજુષિ ભેદમતિશૂન્યમ્ ।
યદ્વચનમાનસપદાદિગમનન્તં તત્વમસિ તચ્ચમસિ તત્ત્વમસિ તત્ત્વમ્ ॥ ૧૨॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।
ઉપદેશ દશશ્લોકી કૃષ્ણાનન્દેન નિર્મિતા ।

ઇતિ કૃષ્ણાનન્દકૃતિષુ ઉપદેશદશકં સમ્પૂર્ણમ્ ॥

Notes:
The upadeshadashakam consists of 12 slokas repeating 48 times the famous mahAvAkyaM મહાવાક્યં of Chāndogyoupanishad tattvamasi તત્ત્વમસિ emphasising the identity of the individual soul with the Cosmic.

Proofread by Rajesh Thyagarajan

*Upadesha Dashakam*
pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*